# શિવાષ્ટકં

પ્રભું પ્રાણનાથં વિભું વિશ્વનાથં
જગન્નાથનાથં સદાનન્દભાજામ્ ।
ભવદ્ભવ્યભૂતેશ્વરં ભૂતનાથં
શિવં શઙ્કરં શમ્ભુમીશાનમીડે ।। ૧।।
ગલે રુણ્ડમાલં તનૌ સર્પજાલં
મહાકાલકાલં ગણેશાધિપાલમ્ ।
જટાજૂટભઙ્ગોત્તરઙ્ગૈર્વિશાલં
શિવં શઙ્કરં શમ્ભુમીશાનમીડે ।। ૨।।
મુદામાકરં મણ્ડનં મણ્ડયન્તં
મહામણ્ડલ ભસ્મભૂષધરંતમ્ ।
અનાદિહ્યપારં મહામોહહારં
શિવં શઙ્કરં શમ્ભુમીશાનમીડે ।। ૩।।
તટાધો નિવાસં મહાટ્ટાટ્ટહાસં
મહાપાપનાશં સદાસુપ્રકાશમ્ ।
ગિરીશં ગણેશં મહેશં સુરેશં
શિવં શઙ્કરં શમ્ભુમીશાનમીડે ।। ૪।।
ગિરિન્દ્રાત્મજાસંગ્રહીતાર્ધદેહં
ગિરૌ સંસ્થિતં સર્વદા સન્નગેહમ્ ।
પરબ્રહ્મબ્રહ્માદિભિર્વન્દ્યમાનં
શિવં શઙ્કરં શમ્ભુમીશાનમીડે ।। ૫।।
કપાલં ત્રિશૂલં કરાભ્યાં દધાનં
પદામ્ભોજનમ્રાય કામં દદાનમ્ ।
બલીવર્દયાનં સુરાણાં પ્રધાનં
શિવં શઙ્કરં શમ્ભુમીશાનમીડે ।। ૬।।
શરચ્ચન્દ્રગાત્રં ગુણાનન્દ પાત્રં

ત્રિનેત્રં પવિત્રં ધનેશસ્ય મિત્રમ્ ।
અપર્ણાકલત્રં ચરિત્રં વિચિત્રં
શિવં શઙ્કરં શમ્ભુમીશાનમીડે ।। ૭।।
હરં સર્પહારં ચિતા ભૂવિહારં
ભવં વેદસારં સદા નિર્વિકારમ્ ।
શ્મશાને વદન્તં મનોજં દહન્તં
શિવં શઙ્કરં શમ્ભુમીશાનમીડે ।। ૮।।
સ્તવં યઃ પ્રભાતે નરઃ શૂલપાણે
પઠેત્ સર્વદા ભર્ગભાવાનુરક્તઃ ।
સ પુત્રં ધનં ધાન્યમિત્રં કલત્રં
વિચિત્રં સમાસાદ્ય મોક્ષં પ્રયાતિ ।। ૯।।